2022 XI 22 0230 Seat No. | | | | | |

Time : 1½ Hours FIRST-TERM SANSKRIT LANG. II

Subject Code

| H | 4 | 4 | 2 | 6 |

Total No. of Questions : 40 (Printed Pages : 12) Maximum Marks : 40

**सूचना** : (*i*) प्रश्नपत्रे **त्रयः** खण्डाः सन्ति।

(*ii*) आहत्य 40 प्रश्नाः सन्ति। प्रत्येकं प्रश्नस्य 1 अङ्कः।

(*iii*) प्रत्येकं प्रश्नस्य सूचनानुसारं चतुर्भ्यः सम्भावनीयोत्तरेभ्यः योग्यं उत्तरं चित्वा OMR पत्रे तस्य वर्तुलं पूरणीयम्।

## प्रथमः खण्डः — पठितावबोधनम्

पाठानुसारं समुचितमुत्तरं चिनुत। (प्रश्न क्र. **1** तः **5** पर्यन्तम्) :

1. आचार्याय किम आहर्तव्यम् ?

(A) प्रियं वाक्यम्

(B) प्रियं वस्त्रम्

(C) प्रियं धनम्

(D) प्रियं ज्ञानम्

2. दौवारिकाः कस्य आज्ञां शिरसा वहन्ति ?

(A) जनकस्य

(B) शिववीरस्य

(C) आचार्यस्य

(D) ब्रह्मणः

3. कस्यै न प्रमदितव्यम् ?

(A) प्रीत्यै

(B) मत्यै

(C) प्रकृत्यै

(D) भूत्यै

4. नीचा: उत्कोचलोभेन कं वञ्चयित्वा आत्मानम् अन्धतमसि पातयन्ति ?

(A) स्वामिनम्

(B) भ्रातरम्

(C) दौवारिकम्

(D) पितरम्

5. क: देव: इव सम्माननीय: इति उक्तम् ?

(A) नृपति:

(B) सुमति:

(C) पति:

(D) अतिथि:

वाक्यानि क: कं प्रति वदति इति चिनुत। (प्र. क्र. **6** त: **8** पर्यन्तम्) :

6. इत आयाहि किमपि कर्णे कथयिष्यामि।

(A) दौवारिक: संन्यासिनं प्रति वदति।

(B) शिववीर: दौवारिकं प्रति वदति।

(C) संन्यासी दौवारिकं प्रति वदति।

(D) दौवारिक: गौरसिंहं प्रति वदति।

7. इतस्तु सत्यं कथय कस्त्वम् ? कुतः आयातः ?

(A) संन्यासी दौवारिकं प्रति वदति।

(B) संन्यासी गौरसिंह प्रति वदति।

(C) गौरसिंहः दौवारिकं प्रति वदति।

(D) दौवारिकः संन्यासिनं प्रति वदति।

8. आर्य! क्षम्यताम् अनुचितः व्यवहारः अस्य ग्राम्यवराकस्य।

(A) संन्यासी महाराजशिववीरं प्रति वदति।

(B) दौवारिकः गौरसिंहं प्रति वदति।

(C) गौरसिंहः दौवारिकं प्रति वदति।

(D) दौवारिकः महाराजशिववीरं प्रति वदति।

पाठानुसारं समुचितमुत्तरं चिनुत। (प्र. क्र. **9** तः **14** पर्यन्तम्) :

9. जिजामाता शिवराजं कां सेवितुम् अकथयत् ?

(A) ईश्वरम्

(B) संन्यासिनम्

(C) गोमातरम्

(D) स्वराज्यम्

10. कः द्वेष्योऽपि सम्मतः ?

(A) शिष्टः

(B) दुष्टः

(C) प्रियः

(D) त्याज्यः

11. कुररी कथं रोदिति ?

(A) सखीव

(B) पितेव

(C) भ्रातेव

(D) मातेव

12. अस्तंगतः कः भूयः उदेति इति जिजामाता वदति ?

(A) चन्द्रः

(B) वृक्षः

(C) भानुः

(D) वीरः

13. के श्रीरामनाम मधुरं क्वणन्ति ?

(A) असुराः

(B) सुशुकाः

(C) पामराः

(D) अमराः

14. कः नन्दनजं मरन्दं वहति ?

(A) प्रतापः

(B) वायुः

(C) तरुः

(D) शत्रुः

अधोलिखितपद्यखण्डस्य आधारेण समुचितम् उत्तरं चित्वा रिक्तस्थानपूर्तिं कुरुत। (प्र. क्र. **15** तः **18** पर्यन्तम्)

प्रतिक्षणं क्षीयत आयुरेतत्, नायाति यातोऽवसरः कदापि।

तन्मा कृथा जातु वृथा स्वमायुः, पले, क्षणे वा दिवसेऽथ मासे॥

15. एतत् .................... प्रतिक्षणं क्षीयते।

    (A) आयुः

    (B) कृथाः

    (C) यातः

    (D) अवसरः

16. तत्स्वम् आयुः पले, क्षणे वा .................... अथ मासे जातु वृथा मा कृथाः।

    (A) मध्याह्ने

    (B) प्रभाते

    (C) वर्षे

    (D) दिवसे

प्रजानामेव भूत्यर्थं स ताभ्यो बलिमग्रहीत्।

सहस्रगुणमुत्स्रष्टुमादत्ते हि रसं रविः॥

17. सः .................... भूत्यर्थं एव ताभ्यो बलिमग्रहीत्।

    (A) रसानाम्

    (B) गुणानाम्

    (C) प्रजानाम्

    (D) तासाम्

18. रविः सहस्रगुणम् .................. हि रसम् आदत्ते।

(A) प्रष्टुम्

(B) उत्स्रष्टुम्

(C) द्रष्टुम्

(D) दातुम्

**द्वितीयः खण्डः — अपठितावबोधनम्**

समुचितमुत्तरं चिनुत । (प्र. क्र. **19** तः **21** पर्यन्तम्) :

19. ऋग्वेदः, यजुर्वेदः, सामवेदः .................. च एते चत्वारः वेदाः।

(A) आयुर्वेदः

(B) धनुर्वेदः

(C) अथर्ववेदः

(D) ध्यानवेदः

20. कविकालिदासेन रचितं महाकाव्यं किम् ?

(A) शिवराज्योदयम्

(B) किरातार्जुनीयम्

(C) शिवराजविजयम्

(D) रघुवंशम्

21. प्रतापविजयम् इति काव्यस्य रचयिता कः ?

(A) श्री भा. वर्णेकरः

(B) पं. अम्बिकादत्तव्यासः

(C) ईशदत्तशास्त्री

(D) महाकविभासः

अधोलिखितपरिच्छेदं पठित्वा प्रश्नानां समुचितानि उत्तराणि चिनुत। (प्र. क्र. **22** त: **26** पर्यन्तम्) :

सज्जनानां सम्पर्क:, सङ्गति: वा सत्सङ्गति: कथ्यते। दुर्जनानां सम्पर्क: कुसङ्गति: इत्युच्यते। जीवनस्य सफलतायै सत्सङ्गति: अतीव महत्वपूर्णा। मनुष्य: सामाजिक: प्राणी अस्ति। सङ्गत्या: तस्योपरि महान् प्रभाव: भवति। बालकेषु सङ्गते: प्रभाव: झटिति भवति। ते समीपवर्तिनाम् अनुकरणं शीघ्रं कुर्वन्ति। सत्सङ्गत्या निर्गुणोऽपि सगुण: भवति, अधर्मात्मा अपि धर्मशील:, पापी अपि पुण्यवान् भवति। यथा वाल्मीकि: नारदस्य प्रभावात् महर्षि: आदिकवि: च अभवत्। कुसङ्गात् मानवस्य बुद्धि: नश्यति, मानव: व्यसनानाम् अधीनो भवति। स: कुत्रापि सम्मानं न लभते। अत: जीवने निजसुखाय, आत्मकल्याणाय च सत्सङ्गति: एव सेव्या:

22. कस्य सफलतायै सत्सङ्गति: अतीव महत्वपूर्णा ?

(A) धनस्य

(B) सुखस्य

(C) कार्यस्य

(D) जीवनस्य

23. मनुष्य: कीदृश: प्राणी अस्ति ?

(A) सामाजिक:

(B) पौराणिक:

(C) धार्मिक:

(D) ऐतिहासिक:

24. केषु सङ्गतेः प्रभावः शीघ्रं भवति ?

(A) छात्रेषु

(B) मित्रेषु

(C) युवकेषु

(D) बालकेषु

25. वाल्मीकिः कस्य प्रभावात् महर्षिः अभवत् ?

(A) शिवस्य

(B) इन्द्रस्य

(C) नारदस्य

(D) कृष्णस्य

26. कुसङ्गात् मानवस्य का नश्यति ?

(A) उन्नतिः

(B) बुद्धिः

(C) कृतिः

(D) नियतिः

## तृतीयः खण्डः — व्याकरणम्

समुचितमुत्तरं चिनुत। (प्र. क्र. **27** तः **36** पर्यन्तम्) :

27. दधात्युषसि इत्यत्र सन्धिविच्छेदः –

(A) दधाति + उषसि

(B) दधात्य + उषसि

(C) दधातु + उषसि

(D) दधात् + युषसि

28. सन्धिं कृत्वा लिखत – वायुः + यदा

(A) वार्युयदा

(B) वायुर्यदा

(C) वायुयर्दा

(D) वायुरयदा

29. न अवधानि अस्य समस्तपदम् अस्ति –

(A) नावधानि

(B) अवधानि

(C) अनवधानि

(D) नोवधानि

30. धृततुम्बीपात्रः – 'धृतं तुम्बीपात्रं येन सः' इत्यत्र कः समासः ?

(A) उपपदतत्पुरुषः

(B) बहुव्रीहिः

(C) कर्मधारयः

(D) द्विगुः

31. औषधम् अस्य पदस्य पर्यायपदम् अस्ति –

(A) आरोग्यम्

(B) चूर्णम्

(C) कषायम्

(D) भेषजम्

32. क्षीरम् इत्यस्य पर्यायपदमस्ति –

(A) दुग्धम्

(B) भूमिः

(C) तक्रम्

(D) पेयम्

33. कातराः इत्यस्य विरुद्धपदम् –

(A) भीरवः

(B) भीताः

(C) शूराः

(D) दुष्टाः

34. लोभः इति कस्य विरुद्धार्थकपदम् ?

(A) क्षोभः

(B) क्रोधः

(C) त्यागः

(D) मोहः

35. पुराण + ठक् = ?

(A) पुराणिक

(B) पोराणिक

(C) पुरिणिक

(D) पौराणिक

36. एषा <u>ब्रह्मवादिनी</u> उग्रतपः करोति। अधोरेखितपदे कः प्रत्ययः ?

(A) टाप्

(B) ङीप्

(C) ठक्

(D) तल्

अधोलिखितवाक्येषु रिक्तस्थानानि पूरयितुं योग्यं पदं चिनुत। (प्र. क्र. **37** तः **40** पर्यन्तम्)

37. वयं कथां .......................... ।

(A) शृणोमि

(B) शृणामः

(C) शृणीमः

(D) शृणुमः

38. .......................... पुस्तकानि सन्ति।

(A) स्यूताय

(B) स्यूतात्

(C) स्यूतेन

(D) स्यूते

39. सः उष्णोदकं .......................... ।

(A) पिबिष्यति

(B) पिबिस्यति

(C) पास्यति

(D) पासिष्यति

40. पिता ........................ उपहारं ददाति।

(A) पुत्र्यै

(B) पुत्रीम्

(C) पुत्र्याः

(D) पुत्र्याम्